# संस्कृत

## सी.बी.एस.ई.

## प्रतिदर्श प्रश्न–पत्र-1

### हल सहितम्

**समय : 2 घंटे**
**पूर्णांक : 40**

**निर्देशाः**

(i) प्रश्नपत्रे **त्रयौ खण्डाः** सन्ति।

| | | |
|---|---|---|
| **खण्डः (अ) अपठित अवबोधनम्** | — | **10 अङ्काः** |
| **खण्डः (ब) रचनात्मक कार्यम्** | — | **15 अङ्काः** |
| **खण्डः (स) पठित अवबोधनम्** | — | **15 अङ्काः** |

(ii) सर्वे प्रश्नाः **अनिवार्याः**।

(iii) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।

(iv) प्रश्न संख्या अवश्यं लेखनीया।

(v) उत्तराणि संस्कृतेन राव लेखनीयानि।

## खण्ड–`अ'

**(अपठित अवबोधनम्)** **10 अङ्काः**

**1. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन लिखत—**

मानवजीवने छात्रजीवनं प्रशस्ततमम् अस्ति। अस्मिन् एव जीवने नरः भावीजीवनस्य निर्माणं करोति। इदं जीवनं चिन्ताशून्यं आनन्दप्रदं च वदन्ति वृद्धाः। सिद्धान्तरूपेण आजन्मनः पञ्चविंशतिवर्षाणि यावत् छात्रजीवनं प्रसरति इति स्वीक्रियते बुधैः। अध्ययनकाले विद्यार्थी सततं महापुरुषैः सह वदति। महाकवीनां काव्यरसं पीत्वा स्वात्मानं पवित्रीकरोति। ये छात्रजीवने सदाचारस्य जीवनम् आप्नुवन्ति ते एव भावीजीवने सफलाः भवन्ति। अतः सर्वथा अभिनन्दनीयम् इदं जीवनम्।

**(अ) एकपदेन उत्तरत—(केवलं प्रश्नद्वयम्)** $1 \times 2 = 2$

**(क)** नरः कस्मिन् जीवने भावीजीवनस्य निर्माणं करोति?

**(ख)** सिद्धान्तरूपेण कतिवर्ष–पर्यन्तं छात्रजीवनं स्वीक्रियते?

**(ग)** छात्र जीवनम् कदा अभिनन्दनीयम् ?

**(आ) पूर्णवाक्येन उत्तरत्—(केवलं प्रश्नद्वयम्)** $2 \times 2 = 4$

**(क)** छात्रः केषां काव्यरसं पीत्वा स्वात्मानं पवित्रीकरोति?

(ख) के भावीजीवने सफला: भवन्ति ?

(ग) अध्ययनकाले विद्यार्थी सततं कै: सह वदति ?

**(इ) शीर्षकलेखनम्** **1 × 1 = 1**

अस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।

**(ई) भाषिक कार्यम्—(केवलं प्रश्नत्रयम्)** **1 × 3 = 3**

(क) 'असफला:' पदस्य विपर्यय: लिखत—

(ख) 'प्राप्यन्ते' इत्यस्य अर्थे अनुच्छेदे क: शब्द: प्रयुक्त: ?

(ग) 'प्रशस्ततमम्' पदं कस्य पदस्य विशेषणमस्ति ?

(घ) 'नर: भावीजीवनस्य निर्माणं करोति' इत्यस्मिन् वाक्ये किं कर्तृपदम् ?

## खण्ड–'ब'
### (रचनात्मकं कार्यम्)

**15 अङ्का:**

**2. भवान् वाराणस्यां स्थित: उमेश:। भवत: मित्र सोमेश: प्रयागे वसति। स नवमकक्षायां प्रथमश्रेण्याम् उत्तीर्ण:। तं प्रति लिखितं वर्धापनपत्रम् उचितशब्दै: पूरयित्वा लिखत।** **½ × 10 = 5** AI

नारायणं संस्कृतविद्यालय:

**(क)** ______________

प्रियमित्र **(ख)** _____________ ।

नमस्ते।

अत्र कुशलं **(ग)** _____________। भवत: पत्रं पठित्वा ज्ञातं यत् भवान् **(घ)**_______________ प्रथम स्थानं प्राप्तवान्। इदं **(ङ)** _____________ मम चित्तं प्रफुल्लं जातम्। **(च)** ________________ एतत् सर्वं तव सततपरिश्रमस्य एव फलम् अस्ति। मम गृहस्य सर्वेषाम् **(छ)** ________________ पक्षत: भवते वर्धापनं भवान् उत्तरोत्तरं सफलतां प्राप्नोतु **(ज)** _______________ अस्माकं शुभकामना। मातृपितृचरणेषु **(झ)** _______________ प्रणामा:। अनुजाय स्नेहाराशि:।

भवत:

**(ञ)** ________________ ।

**मञ्जूषा**

| |
|---|
| वाराणसीत:, मित्रवर्य !, तत्रास्तु, मम, ज्ञात्वा, एषा, उमेश:, परीक्षायां, सदस्यानां, सोमेश !। |

**3. प्रदत्तचित्रं दृष्ट्वा मञ्जूषायां शब्दानां सहायतया पञ्चवाक्यानि संस्कृतेन लिखत—** **1 × 5 = 5**



**मञ्जूषा**

| |
|---|
| ज्ञानवर्धनाय, आवश्यकम्, पुस्तकालये, अनेकानि, पश्यन्ति, कुर्वन्ति, अनेकेषाम्, सन्ति, विषयाणाम्, पठन्ति, स्वाध्यायम्, बाला:, अध्ययनम्, पुस्तकानि। |

**अथवा**

**मञ्जूषायां प्रदत्तशब्दानां सहायतया 'नौकाचालानप्रतियोगिता' इति विषयम् अधिकृत्य पञ्चवाक्यानि संस्कृतेन लिखत।**

**मञ्जूषा** **1 × 5 = 5**

| |
|---|
| दक्षिण-भारते, केरलप्रदेशे:, अनेका जना:, नदीतीरे, एकत्रिता, द्रष्टुं, प्रसिद्धा, भवन्ति, करतलध्वनिं, उत्साहवर्धनम्, कुर्वन्ति, पुरस्कारा:, हर्ष: |

**4.** **हिन्दी भाषया आङ्गलभाषया वा लिखितानां वाक्यानां संस्कृतेन अनुवादः क्रियताम्। (केवलं प्रश्नपञ्चवाक्यम्)** **1 × 5 = 5** AI

| | |
|---|---|
| **(क)** पाकिस्तान हमारा पड़ोसी देश है। | Pakistan is our neighbour country. |
| **(ख)** तुम्हें प्रतिदिन पढ़ना चाहिए। | You should study daily. |
| **(ग)** सीता जनक की पुत्री थी। | Sita was the daughter of Janak. |
| **(घ)** वाराणसी में विश्वनाथ का मन्दिर है। | There is temple of Vishwanath in Varanasi. |
| **(ङ)** सूर्य पूर्व दिशा में उदित होता है। | Sun rises in the east. |
| **(च)** वृक्षों पर पक्षी कलरव करते हैं। | Birds chirping on the trees. |
| **(छ)** गाँव से बाहर नदी बहती है। | River flows through the village. |

## खण्ड–'स'
### (पठित अवबोधनम्)

**15 अङ्का:**

**5.** **अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन लिखत—** **3**

तदा खिन्नो बालक: एते पक्षिणो मानुषेषु नोपगच्छन्ति। तद् अन्वेषयामि अपरं मानुषोचितम् विनोदयितारम् इति विचिन्त्य पलायमानं कमपि श्वानम् अवलोकयत्। प्रीतो बाल: तम् इत्थं सम्बोधयत् — रे मानुषाणां मित्र! किं पर्यटसि अस्मिन् निदाघदिवसे? इदं प्रच्छायशीतलं तरुमूलम् आश्रयस्व। अहमपि क्रीडासहायं त्वामेवानुरूपं पश्यामीति। कुक्कुर: प्रत्यवदत्—

यो मां पुत्रप्रीत्या पोषयति स्वामिनो गृहे तस्य।
रक्षानियोगकरणान्न मया भ्रष्टव्यमीषदपि॥

**(अ) एकपदेन उत्तरत—(केवलं प्रश्नद्वयम्)** **½ × 2 = 1**

**(क)** 'रे मनुष्याणां मित्र! किं पर्यटसि अस्मिन् निदाघदिवसे?'
क: अकथयत्?

**(ख)** एते पक्षिणो केषाम् नोपगच्छन्ति ?

**(ग)** पलायमानं श्वानम् क: अवलोकयत् ?

**(आ) पूर्णवाक्येन उत्तरत—(केवलं प्रश्नद्वयम्)** **1 × 2 = 2**

**(क)** खिन्न: बालक: श्वानं किम् अकथयत्?

**(ख)** स्वामी कुक्कुरं केन पोषयति ?

**(ग)** कुक्कुर: किं कथयति ?

**6.** **अधोलिखितं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन लिखत—** **3**

तं शब्दमवसुप्तस्तु जटायुरथ शुश्रुवे।
निरीक्ष्य रावणं क्षिप्रं वैदेहीं च ददर्श स:।

(अ) **एकपदेन उत्तरत—(केवलं प्रश्नद्वयम्)** ½ × 2 = 1

- **(क)** वैदेहीं क: ददर्श?
- **(ख)** जटायु कम् क्षिप्तं निरीक्षति?
- **(ग)** क: शुश्रुवे?

(आ) **पूर्णवाक्येन उत्तरत—(केवलं प्रश्नद्वयम्)** 1 × 2 = 2

- **(क)** जटायु: किम् शृणोति?
- **(ख)** क: अवसुप्त: आसीत् ?
- **(ग)** जटायु: वैदेहीं वचनम् कदा शुश्रुवे ?

**7.** **अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत—** 3

**पुरुष:** — भोस्तपस्विन्! कथं माम् अवरोधं करोषि। प्रयत्नेन किं न सिद्धं भवति? कावश्यकता शिलानाम्? सिकताभिरेव सेतुं करिष्यामि स्वसंकल्पदृढतया।

**तपोदत्त:** — आश्चर्यम्! किम् सिकताभिरेव सेतुं करिष्यसि? सिकता जलप्रवाहे स्थास्यन्ति किम्? भवता चिन्तितं न वा?

**पुरुष:** — (सोत्प्रासम्) चिन्तितं चिन्तितम्। सम्यक् चिन्तितम्। नाहं सोपानसहायतया अधिरोढुं विश्वसिमि। समुत्प्लुत्यैव गन्तुं क्षमोऽस्मि।

**तपोदत्त:** — (सव्यङ्ग्यम्)
साधु साधु! आञ्जनेयमप्यतिक्रामसि!

**पुरुष:** — (सविमर्शम्)
कोऽत्र सन्देह:? किञ्च,
**विना लिप्यक्षरज्ञानं तपोभिरेव केवलम्।**
**यदि विद्या वशे स्युस्ते, सेतुरेष तथा मम॥**

(अ) **एकपदेन उत्तरत—(केवलं प्रश्नद्वयम्)** ½ × 2 = 1

- **(क)** 'क: अक्षरज्ञानं विनैव वैदुष्यमवाप्तुम् अभिलषति?
- **(ख)** काभि: एव सेतुं करिष्यामि ?
- **(ग)** पुरुष: कुत्र सिकताभिरेव सेतुं निर्मातुं प्रयतते?

(आ) **पूर्णवाक्येन उत्तरत—(केवलं प्रश्नद्वयम्)** 1 × 2 = 2

- **(क)** पुरुष: तपस्विनं किम् अकथयत्?
- **(ख)** जल प्रवाहे के न स्थास्यन्ति?
- **(ग)** स: केन मार्गेण अट्टयाधिरोढुं न विश्वासं करोति?

**8.** **अधोलिखितस्य: श्लोकस्य: अन्वये रिक्तस्थानपूर्ति क्रियताम्—** ½ × 4 = 2 AI

स भग्नधन्वा विरथो हताश्वो हतसारथि:।
अङ्केनादाय वैदेहीं पपात भुवि रावण:॥

**अन्वय:**

स: रावण: **(क)** .................. हताश्वो हतसारथि: **(ख)** .................. अङ्केन **(ग)** .................. भुवि **(घ)** ..................।

| **मञ्जूषा**– वैदेहीं, आदाय, पपात, भग्नधन्वा |
|---|

**अथवा**

**अधोलिखितस्य श्लोकस्य भावार्थ: चित्वा उत्तरपुस्तिकायां पुन: लिखत—** ½ × 4 = 2

**श्लोक:** वृद्धोऽहं त्वं युवा धन्वी सरथ: कवची शरी।
न चाप्यादाय कुशली वैदेहीं मे गमिष्यसि॥

| **मञ्जूषा**– जटायो, रथथुक्त:, वृद्ध, सीतां |
|---|

**भावार्थ:—**जटायु: रावणं कथयति-अहम् **(क)** ............ अस्मि त्वं युवा च। चापि धनुर्धर: **(ख)** ........... कवचधारी वाणधर: भव। मम कुशली **(ग)** ............. गृहीत्वा त्वं न गमिष्यसि। **(घ)** .................. रावणे कटाक्षं प्रतीयते।

**9.** **अधोलिखितं कथांशं समुचित् क्रमेण लिखत—** **½ × 8 = 4** **AI**

**(क)** शुद्धवायुरपि वृक्षकर्तनात् सङ्कटापन्नो जातः।

**(ख)** व्यापारवर्धनाय वनवृक्षा निर्विवेकं छिद्यन्ते, येन अवृष्टिः प्रवर्धते, वनपशवश्च शरणरहिता ग्रामेषु उपद्रवं विदधति।

**(ग)** तत्सर्वमिदानीं चिन्तनीयं प्रतिभाति।

**(घ)** स्वल्पलाभाय जना बहुमूल्यानि वस्तूनि नाशयन्ति।

**(ङ)** धर्मो रक्षति रक्षितः इत्यार्षवचनम्।

**(च)** प्रकृतिरक्षयैव सम्भवति लोकरक्षेति न संशयः।

**(छ)** पर्यावरणरक्षणमपि धर्मस्यैवाङ्गमिति ऋषयः प्रतिपादितवन्तः।

**(ज)** पर्यावरणे विकृतिमुपगते जायन्ते विविधाः रोगाः भीषणसमस्याश्च।

❑❑

# संस्कृत
# सी.बी.एस.ई.
# उत्तरमाला

## खण्ड–`अ'
### (अपठित अवबोधनम्)

10 अङ्काः

**1.** (अ) **एकपदेन उत्तरत-(केवलं प्रश्नद्वय)** **1 × 2 = 2**

**(क)** छात्रजीवने

**(ख)** पञ्चविंशति वर्षाणि

**(ग)** सर्वधा

(आ) **पूर्णवाक्येन उत्तरत-(केवलं प्रश्नद्वय)** **2 × 2 = 4**

**(क)** छात्र: महाकवीनां काव्यरसं पीत्वा स्वात्मानं पवित्रीकरोति।

**(ख)** ये छात्रजीवने सदाचारस्य जीवनं प्राप्नुवन्ति ते एव भावीजीवने सफला: भवन्ति।

**(ग)** अध्ययनकाले विद्यार्थी सततं महापुरुषै: सह वदति।

(इ) **शीर्षक लेखनम्**—छात्रजीवनम् **1 × 1 = 1**

(ई) **भाषिक कार्यम्—(केवलं प्रश्नत्रयम्)** **1 × 3 = 3**

**(क)** सफला: **(ख)** आप्नुवन्ति

**(ग)** छात्रजीवनं **(घ)** नर:

## खण्ड–`ब'
### (रचनात्मकं कार्यम्)

15 अङ्काः

**2.** नारायणं संस्कृतविद्यालय: **½ × 10 = 5**

**(क)** वाराणसीत:

प्रियमित्र **(ख)** सोमेश! ।

नमस्ते।

अत्र कुशलं **(ग)** तत्रास्तु। भवत: पत्रं पठित्वा ज्ञातं यत् भवान् **(घ)** परीक्षायां प्रथम स्थानं प्राप्तवान्। इदं **(ङ)** ज्ञात्वा मम चित्तं प्रफुल्लं जातम्। **(च)** मित्रवर्य! एतत् सर्वं तव सततपरिश्रमस्य एव फलम् अस्ति। मम गृहस्य सर्वेषाम् **(छ)** सदस्यानां पक्षत: भवते वर्धापनं भवान् उत्तरोत्तरं सफलतां प्राप्नोतु **(ज)** एषा अस्माकं शुभकामना। मातृपितृचरणेषु **(झ)** मम प्रणामा:। अनुजाय स्नेहाराशि:।

भवत:

**(ञ)** उमेश:।

**3.** **चित्रवर्णनम्** **1 × 5 = 5**

**(क)** पुस्तकालये पुस्तकं पठनम् ज्ञानवर्धनाय भवति।

**(ख)** अत्र अनेकानि विषयानि पुस्तकानि सन्ति।

**(ग)** अत्र आगत्य बालाः बालिकाः च स्वाध्यायम् कुर्वन्ति।

**(घ)** विद्यालये पुस्तकालयम् आवश्यकम् भवति।

**(ङ)** पुस्तकालये अनेकानाम् विभागानाम् विषयाणाम् पुस्तकानि उपलब्धानि सन्ति।

**अथवा**

**अनुच्छेद लेखनम्—** **1 × 5 = 5**

**(क)** दक्षिण भारते केरल प्रदेशे नौकाचालनप्रतियोगिताः भवन्ति।

**(ख)** एकत्रिताः नायिकानाम् उत्साहवर्धनं कुर्वन्ति।

**(ग)** अनेके जनाः प्रतियोगितां दृष्ट्वा हर्षम् अनुभवन्ति।

**(घ)** विजेताः पुरस्काराः लभन्ते।

**(ङ)** जनाः करतलध्वनिं कुर्वन्ति।

**4.** **अनुवादः** (केवल प्रश्नद्वयं) **1 × 5 = 5**

**(क)** पाकिस्तानः अस्माकं प्रतिवेशी देशः अस्ति।

**(ख)** त्वं प्रतिदिनं पठेः।

**(ग)** सीता जनकस्य सुता आसीत्।

**(घ)** वाराणस्यां विश्वनाथस्य देवालयम् अस्ति।

**(ङ)** सूर्यः पूर्वस्यां दिशि उदयति/उदेति।

**(च)** वृक्षेषु पक्षिणः कलरवं कुर्वन्ति।

**(छ)** ग्रामात् बहिः नद्याः वहति।

## खण्ड–'स'
**(पठित अवबोधनम्)**

**15 अङ्काः**

**5.** **गद्यांशः** **3**

**(अ)** **एकपदेन उत्तरत-(केवलं प्रश्नद्वय)** **½ × 2 = 1**

**(क)** बालः **(ख)** मनुषेषु **(ग)** भ्रान्तोबालः।

**(आ)** **पूर्णवाक्येन उत्तरत-(केवलं प्रश्नद्वय)** **1 × 2 = 2**

**(क)** खिन्नः बालकः श्वानम् अकथयत्–अस्मिन् निदाघदिवसे किं पर्यटसि? आश्रयस्वेदं प्रच्छायशीतलं तरुमूलम्। अहमपि क्रीडासहायं त्वामेवानुरूप पश्यामीति।

**(ख)** स्वामी कुक्कुरं पुत्रप्रीत्या पोषयति।

**(ग)** कुक्कुरः कथयति–मया ईषदपि न भ्रष्टव्यम्। **3**

**6.** **पद्यांश (केवलं प्रश्नद्वयं)** **½ × 2 = 1**

**(अ)** **एकपदेन उत्तरत**

**(क)** जटायुः **(ख)** रावणं **(ग)** जटायुः

**(आ)** **पूर्णवाक्येन उत्तरत-(केवलं प्रश्नद्वयं)** **1 × 2 = 2**

**(क)** जटायु वैदेहीं वचनम् शृणोति।

**(ख)** जटायुः अवसुप्तः आसीत्।

**(ग)** जटायुः यदा अवसुप्तः तदा वैदेहीं वचनम् शुश्रुवे।

**7.** (अ) **नाट्यांशं—**

**एक पदेन उत्तरत-(केवलं प्रश्नद्वय)** **½ × 2 = 1**

**(क)** तपोदत्तः **(ख)** सिकताभिः **(ग)** नद्यां।

**(आ) पूर्णवाक्येन उत्तरत-(केवलं प्रश्नद्वयं)** **1 × 2 = 2**

**(क)** पुरुषः तपस्विनं अकथयत् - भोस्तपस्विन्! कथं माम् अवरोधं करोषि?
सेतुनिर्माणाय शिलानाम् का आवश्यकता? अहम् स्वसंकल्पदृढ़तया सिकताभिः एव सेतु निर्माणं करिष्यामि।

**(ख)** जलप्रवाहे सिकताः न स्थास्यन्ति।

**(ग)** सः सोपान मार्गे अट्टयाधिरोढुं न विश्वासं करोति।

**8. अन्वयः** **½ × 4 = 2**

सं: रावणः **(क)** भग्नधन्वा हताश्वो हतसारथिः **(ख)** वैदेहीं अङ्केन **(ग)** आदाय भुवि **(घ)** पपात।

**अथवा**

**भावार्थः**—जटायुः रावणं कथयति-अहम् **(क)** वृद्ध अस्मि त्वं युवा च। चापि धनुर्धरः **(ख)** रथयुक्तः कवचधारी वाणधरः भव। मम कुशली **(ग)** सीतां गृहीत्वा त्वं न गमिष्यसि। **(घ)** जटायो रावणे कटाक्षं प्रतीयते। **½ × 4 = 2**

**9. कथा क्रमलेखनं** **½ × 8 = 4**

**(क)** स्वल्पलाभाय जना बहुमूल्यानि वस्तूनि नाशयन्ति।

**(ख)** वनवृक्षा निर्विवेकं छिद्यन्ते व्यापारवर्धनाय, येन अवृष्टिः प्रवर्धते, वनपशवश्च शरणरहिता ग्रामेषु उपद्रवं विदधति।

**(ग)** शुद्धवायुरपि वृक्षकर्तनात् सङ्कटापन्नो जातः।

**(घ)** पर्यावरणे विकृतिमुपगते जायन्ते विविधा रोगाः भीषण समस्याश्च।

**(ङ)** तत्सर्वमिदानीं चिन्तनीयं प्रतिभाति।

**(च)** धर्मो रक्षति रक्षितः इत्यार्षवचनम्।

**(छ)** पर्यावरण रक्षणमपि धर्मस्यैवाङ्गमिति ऋषयः प्रतिपादितवन्तः।

**(ज)** प्रकृतिरक्षयैव सम्भवति लोकरक्षेति न संशयः।

❑❑